# प्रतिमानाटकस्य मुख्यो रसः

# Pratima Nataka Aya mukh Rasa:

Paper Submission: 10/12/2021, Date of Acceptance: 21/12/2021, Date of Publication: 23/12/2021



**विनोद कुमार मिश्र**
शोधार्थी,
साहित्य एवम् धर्मशास्त्र
का. सिं.द.सं.
विश्वविद्यालयः,
दरभंगा बिहार भारत

## सारांश

प्रबन्धकाव्ये रसानां निवेशः भूयस्त्वेन भवति। आनन्दरूपाणां रसानां समावेशेनैव प्रबन्धकाव्यम् आनन्दात्मकं जायते। अत्र आचार्याः कथयन्ति यत् व्यङ्ग्यव्य´्जकभावेन विविधेषु रसेषु वर्तमानेष्वपि एकस्मिन् रसे कवेः विशिष्टमवधानं भवति येन स एव मुख्यो रसो जायते। यथा महाभारते शान्तो रसः प्रधानः, रामायणे च करुणरसस्य प्राधान्यम्। एवमेव भासरचितस्य प्रतिमानाटकस्य विषये आचार्येषु इतिहासकारेषु च विवादः वर्तते यत् अत्र कस्य रसस्य प्राधान्यम्? केचित् इह रामकथाश्रितत्वात् रामस्य नायकस्य औचित्येन वीरं रसं मुख्यं मन्यन्ते, किन्तु केचित् कथानकस्य करुणप्रवणत्वात् करुणमेव रसं प्रधानं कथयन्ति। यद्यपि करुणरसप्रधानं नाटकं नाट्यशास्त्रिभिः नानुमतं न च परम्पराप्राप्तं तथापि रसप्राधान्ये कथानकं तथा पात्राणि च विमृश्यन्ते। प्रतिमानाटके भरतमूलकं राममूलकं तथा सुग्रीवादिपात्रमूलक´्च कथानकं वर्तते। सर्वाणि पात्राणि शोकं लभन्ते इति करुणरसप्रधानमिदं नाटकमिति।

Prabandh Kavya Rasanam Nivesh: Bhuyastven Bhavati. Anandarupanaam rasanaam sakalenenav prabandha kavyam anandantakam jayate. Atra ācārya: kathayanti yat vyāgyavyjakabhaven vividheshu raeshu avrateshvapi eksmin rase kave: vishishtamvadhanam bhavati yen sa eva maino raso jayate. As in Mahabharata, Shanto Rasah Pradhanah, Ramayanae Cha Karunarasya Pradhanyam. Evameva Bhasarachitsya Pratimatnakasya Visehe Acharyeshu Historianeshu Cha controversy: Varate yatra kasya rasya pradhanyam? Kechit eh ram katha srivat ramsay nayakasya uddhiyen veeram rasam mainam manyyante, but kechit kathaya karuna pravana at karuna rasam pradhan kathayanti. Although Karunaraspradhane Natakam Natyashastra Bhi Nanumtam na ch Paramparapi, yet Rasapradhanye Kathalan and Patrani ch Vimrishyante. The Bharatmoolkam Rammoolkam and Sugrivadipatramoolkancham plots of the paradigm. Sarvani Patrani Shokam Labhante Iti Karunaraspradhanamidam Natyamati.

**मुख्यशब्दः** रसः, स्थायिभावः, प्रबन्धकाव्यम्, नाट्यशास्त्री, कथानकम्, पात्राणि।
**Keywords:** Rasah, Sthayabhavah, Prabandhakavyam, Natyashastri, Kathanam, Patrani.

**प्रस्तावना**

प्रबन्धकाव्ये दृश्ये श्रव्ये वा कथानकं, नेता रसश्चेति त्रयमावश्यकं भवति। तेषु सर्वेषु रसात्मकता प्रधानत्वेन विवेच्यते। अर्थात् काव्यमात्रं रसात्मकं भवति। रसश्च न अभिधेयः प्रत्युत व्यङ्ग्यः भवति, व्यजननावृत्तिगम्यः इति यावत्। यद्यपि श्रृङ्गारादयः नवरसाः यथायथम् आवश्यकतानुसारं प्रबन्धकाव्ये महाकाव्यरूपे नाटकरूपे वा प्रयुज्यन्ते तथापि आनन्दवर्धनःध्वन्यालोके प्रतिपादयति यत् बहुषु रसेषु विद्यमानेष्वपि कविना कस्मिन्नपि एकस्मिन् रसे विशिष्टमवधानं कुर्यात्। भासकृतस्य प्रतिमानाटकस्य विवेचनेऽपि प्रश्नोऽयं समुत्थितः यत् नाटकेऽस्मिन् कतमो रसः प्रधानः? अस्मिन्नाटके करुण-वीर-भयानक-हास्यप्रभृतयः रसाः प्रयुक्ताः। तत्र वीरे रसे करुणे वा प्रधानत्वविषये वर्तते प्रतिस्पर्धा। निबन्धेऽस्मिन् करुणरसस्य प्राधान्यं दर्शितमस्ति।

**प्रविधिः**

शोधनिबन्धेऽस्मिन् विविधानां ग्रन्थानामनुशीलनेन प्रधानरसविमर्शविषयः समुत्थापितः। तत्र सामग्रीसंकलनेन मूलग्रन्थावलोकनेन च समस्यासादिता। तत्र पूर्वोत्तरपक्षविचारेण निर्णयस्य सिद्धिः कृता। अस्मिन् विषये विशेषज्ञानां परामर्शोऽपि गृहीतः।

**मूलनिबन्धः विवेचन´्च**

कवेः कर्म काव्यमिति कथ्यते। काव्य´्च द्विधा विभज्यते-प्रबन्धकाव्यं मुक्तक´्च। प्रबन्धकाव्ये सम्पूर्णं कथानकं शरीरे विभिन्नावयवैः समन्वयरीत्या सुबद्धं भवति। मुक्तके तु प्रतिपद्यं प्रतिवाक्यं वा परस्परं प्रतिबद्धता न भवति। प्रबन्धकाव्येष्वेव कानिचन दृश्यकाव्यानि अपरत्र कानिचित्श्रव्याणि महाकाव्यादीनि भवन्ति। श्रव्यकाव्यापेक्षया दृश्यकाव्यस्य भूयो महत्त्वं भवति। वामनः काव्यालङ्कारसूत्रवृत्तौ प्रतिपादयति- सन्दर्भेषु दशरूपकं श्रेयः।[1] कि´्च नानारुचीनां सामाजिकानाम् एकत्र मनोर´्जनसाधनं दृश्यकाव्यं नाट्यरूपमिति कालिदासोऽपि मालविकाग्निमित्रे कथयति-

**नाट्यं भिन्नरुचेर्जनस्य बहुधाप्येकं समाराधनम्।**[2]

संस्कृतवाङ्मये नाटकानाम् अनन्ता परम्परा वर्तते, नाट्यशास्त्रकालात् अद्यावधिः। नाटकं रङ्गम´्चेषु प्रदर्शनाय भवति, सामाजिकाः अभिनयं पश्यन्ति तेन आनन्दं च लभन्ते। अतएव दृश्यश्रव्ययोः उभयोः सम्मेलनात् दृश्यकाव्यं नाटकादि सुतरामानन्दं सृजतीति न संशयः। भरतस्य

नाट्यशास्त्रं (300 ई.पू.) नाटकस्य लेखनस्य अभिनयस्य च कृते नानानियमान् प्रस्तावितवत्। ते नियमाः प्राचीनकालिकैः लेखकैः सर्वथा न गृहीताः, प्रत्युत स्वतंत्रतया ते स्वसामर्थ्येन स्वतंत्रबुद्ध्या कल्पनया वा नाटकं रचयामासुः। महाकविर्भासोऽपि तथैव नाटककारः। अद्यत्वे उपलब्धनाटकेषु प्राचीनतमानां नाटकानां रचयितासौ ईस्वीपूर्वकालस्य कविः। तेन त्रयोदश नाटकानि लघुकायानि बृहत्कायानि वा रचितानि। तानि विंशशताब्द्याः प्रथमदशके एव अकस्मात् लब्धानि इति तेषां महत्त्वम्। तेषु नाटकेषु रामायणाश्रितं नाटकद्वयम्- अभिषेकनाटकं प्रतिमानाटक´्च। प्रतिमानाटकस्य मुख्यरसविमर्शाय निबन्धेऽस्मिन् प्रयत्नवान् अयं लेखकः।

प्रबन्धकाव्ये रसात्मके मुख्यस्य रसस्य विचारः ध्वनिवादिभिः आचार्यैः उपक्रान्तः। तथाहि आनन्दवर्धनः ध्वन्यालोके चतुर्थोद्योते कथयति-

**व्यंग्य-व्यंजक-भावेऽस्मिन् विविधे सम्भवत्यपि।**
**रसादिमय एकस्मिन् कविः स्यादवधानवान्॥**[3]

प्रबन्धकाव्यं दृश्यं वा श्रव्यं वा भवतु, एकस्य रसस्य प्रधानता तत्र भवत्येव। आनन्दवर्धनः स्वग्रन्थे श्रव्यकाव्यस्यैव दृष्टान्तं दत्तवान्। यथा रामायणे करुणरसस्य महाभारते च शान्तरसस्य प्राधान्यं युक्तिभिः तत्र प्रतिपादितवान्। दृश्यकाव्यविषये तत्प्रसङ्गे न किमप्युक्तवान्। किन्तु नाट्यलक्षणकाराः तदनु प्रधानरसविमर्शं कृतवन्तः। नाट्यशास्त्रकारो भरतस्तु नाटके नानारसानां सत्त्वं प्रतिपादयन् निर्वहणे अद्भुतरसस्य प्रयोगं विधत्ते,[4] न नाटकस्य प्रधानरसविषये किमपि कथयति। किन्तु परवर्तीकाव्यशास्त्री विश्वनाथः स्वकीये साहित्यदर्पणे स्पष्टरूपेण मुख्यरसविषये नाटकसन्दर्भे निवेदयति-

**एक एव भवेदङ्गी श्रृङ्गारो वीर एव वा।**
**अङ्गमन्ये रसाः सर्वे कार्यो निर्वहणेऽद्भुतः॥**[5]

विश्वनाथः चतुर्दशशतके आविर्भूतः। तस्य काले प्राप्तेषु नाटकेषु अयमेव नियमः प्रचलितः आसीत्। भासस्य कालः पूर्वोक्तः 300 ई. पू. इति वर्तते यदा नाट्यशास्त्रीयाः नियमाः रूढाः नासन्। तदानीं स्वतंत्राः निरंकुशाः वा कवयः भूयांसो बभूवुः। अतएव वीरश्रृङ्गारयोः रसयोः प्राधान्यविषये कालान्तरे प्रवृत्तो नियमः नासीदावश्यकः।

भासनाटकानां यदोद्धारः डॉ. गणपतिशास्त्रिणा केरलप्रदेशपुस्तकालयेभ्यः हस्तलेखरूपेण कृतः पदा तेन पृथक्-पृथक् तानि नाटकानि विभिन्नेभ्यः प्रकाशनसंस्थानेभ्यः प्रकाशितानि। स्वकीयस्य प्रतिमानाटकसंस्करणस्य भूमिकायामसौ प्रतिपादितवान् यत् इह मुख्यो रसः वीरः। तत्रापि रामस्य नायकस्य धर्मवीररूपं प्रतिमानाटके वर्तते। धीरोदात्तो नायको रामः। तद्गता धर्मवीरता नाटकेऽस्मिन् प्रकटिता। व्यापकोऽपि करुणरसः वीरस्यैवाङ्गभूतः।[6]

अत्र निवेदनीयं यत् करुणरसो यदि व्यापको वर्तते तर्हि कथम् अंशव्यापकस्य वीरस्य रसस्य अङ्गभूतायते? यस्य रसस्य प्राधान्यं भवति स एव प्रबन्धव्यापी जायते। अतः वीररसस्य अत्यल्पमुद्भावितस्य प्रधानत्वे प्रश्नः समुदेति ?

इदंप्रथमतया आनन्दशंकर बापूभाई (ए.वी.) ध्रुवमहोदयः प्रतिपादयति यत् नाट्यनियमातिक्रमणेनापि प्रतिमानाटके वस्तुस्थित्या करुणरसप्राधान्यं वर्तते। नायको रामः पितृवचनपालकत्वेन धर्ममार्गानुयायितया सामाजिकानां हृदयेषु शोकभावं जनयति। शोकश्च करुणरसस्य स्थायिभावः। अतः करुणरसप्रधानं प्रतिमानाटकं वर्तते।

ए.डी. पुसलकरमहोदयः स्वकीये भासविषयके महाग्रन्थे ध्रुवमहोदयस्य मतं निर्दिश्य तत्समर्थनं करोति। अस्य नाटकस्य एकैका घटना येन केन प्रकारेण करुणरससमर्थनाय निहिता वर्तते। प्रतिमानाटकस्य चतुर्थाङ्कारम्भे प्रवेशकभागे करुणं वातावरणं कि चित् शिथिलयितुमेव हासमयो संवादो दत्तः। यथा-

(कैकेयी) अवलोकितुमपि नेच्छति कुमारः, किं भणितम्?[7] इत्थं करुणरसस्य व्यापकत्वं नाटकेऽस्मिन् विद्यते।[8]

नेमिचन्द्रशास्त्री भासस्योपरि रचिते स्वविशालग्रन्थे प्रतिपादयति यत् करुणरसजनकानां घटनानां मनोरमचित्रणेऽपि प्रतिमानाटकं वीररसप्रधानमेव वर्तते।[9]शास्त्रिवर्यः स्वमतसाधनाय न किमपि प्रमाणं विवेचनं वा प्रस्तौति। अतएव न्यायदर्शने निर्दिष्टं वचनमिह प्रस्तोतुं शक्यते-

**एकाकिनी प्रतिज्ञा हि प्रतिज्ञातं न साधयेत्। इति।**

अतः वचनमेतत् वचोमात्रमिति उपेक्षणीयम्। नास्य महत्त्वमिति।

अतःपरं सत्यव्रत सिंहः प्रतिमानाटकसंस्करणप्रस्तावनायां करुणरसप्रधानत्वं युक्तिपूर्वकं साधयति। रामकथाश्रिते अपरस्मिन् भासीये नाटके अभिषेके करुणस्य रसस्य उद्भावनम् अत्यल्पपरिमाणेन दृश्यते। तत्र रामाभिषेकः एव लक्ष्यं वर्तते। तत्साधनत्वेन सुग्रीवाभिषेकः विभीषणाभिषेकश्च वर्णितौ। अतएव तत्राभिषेकार्थं वीरःरसः एव प्रधानो वर्तते। एतेन प्रभाविताः एव विद्वांसः रामकथाश्रितस्य प्रतिमानाटकस्यापि प्रधानं रसं वीरं मन्यन्ते इति वक्तुं शक्यते। परस्मिन् काले ध्वनिकारः आनन्दवर्धनः प्रबन्धकाव्येषु प्रधानस्य रसस्य अनिवार्यतां साधयन् रामायणे करुणो रसः

प्रधानः इत्युक्तवान्।[10]अतएव रामायणात् प्रतिमाकथानक कल्पयन् भासः स्वयमपि रामायणस्य करुणरसप्रधानतया तादृशं कथावस्तु विरचितवान्। प्रतिमावृत्तान्तेनैव भारतस्य कारुणिकत्वं शोकप्रवणत्व´्च सूचितं भवति। प्रतिमानाटकस्य नायकः रामोऽपि करुणेनैव रसेन संवलितः अत्र चित्रितः। पितुर्वचनपालनार्थं कानने अनेकाः विपदः साक्षात्करोति रामः। सीताहरणमपि कारुणिकः एव। एकस्मादपरं दुःखं सहमानः रामः दुःखपरम्परां साक्षात्करोति इति न संशयः।

सर्वाश्च रामगताः भरतगताः वा विपदः प्रतिमानाटके दृश्य-श्रव्यमाध्यमेन प्रकटिताः'। अतः नाट्यशास्त्रप्रतिपादितनियमान् अतिक्रम्यापि भासः करुणरसप्रधानं नाटकम् अरीरचत् इति न संदेहः। करुणरसप्रधाने नाटके यदि परिहासस्य अवकाशः जायते तदासौ गाम्भीर्यस्थितेः शिथिलीकरणार्थमेव यथा रामः प्रतिमानाटके प्रथमाङ्के सीतायाः क्रीडामात्रेण वल्कलधारणे सति परिहसति-

**आदर्शे वल्कलानीव किमेते सूर्यरश्मयः।**

**हसितेन परिज्ञातं क्रीडेयं नियमस्पृहा॥**[11]

अर्थात् हे सीते, वद त्वम्। किमिदं वल्कलधारणं तव परिहासरूपा क्रीडा वर्तते अथवा व्रतधारणाय ते संकल्पः? प्रसङ्गोऽयं विपरीतस्थितिदर्शनाय भासेन दत्तः करुणरसस्य सुतरामुद्भावनाय। यथा भवभूतिना उत्तररामचरिते प्रथमाङ्के चित्रदर्शनप्रसङ्गः सीतारामयोर्मध्ये महतीं प्रीतिमुद्भाव्य परवर्तिकाले भाविनो विरहस्य प्रकर्षदर्शनाय करुणरसपोषणाय च आनीतः। तद्वदेव अत्रापि प्रतिमानाटके करुणपोषणाय विनोदप्रसङ्गः वर्तते।

कि तत्रैव लक्ष्मणस्य कोपपूर्वकं कथनमपि करुणस्य पूर्वपीठिकां सबलिकरोति यत्र स कथयति यत् युवत्या कैकेय्या छलितं रघुकुलं येन क्रमागतं यौवराज्यं रामस्य हस्तात् निर्गतम्। सीता स्वयं तस्य करुणकालस्य पोषणं करोति कथयति च-

**रोदितव्ये काले सौमित्रिणा धनुर्ग्रहीतमिति।**[12]

नाटकस्यास्य द्वितीयाङ्के रामविरहे राज्ञो दशरथस्य वैक्लव्यं विलपनं परितापः भूपतनं चेत्यादयः अनुभावाः तत्रैव दर्शिताः। पुत्रविरहशोकाग्निना दग्धहृदयः उन्मत्तः इव बहु प्रलपन् समुद्रगृहिके शयानः खलु राजा इति का´्चुकीयः आरम्भे एव निवेदयति। विलापः पूर्णविस्तारेण वर्णितो राज्ञः। कि´्च रामविरहे पशवःपक्षिणश्च तथैव विलपन्ति यथा अभिज्ञानशाकुन्तले चतुर्थाङ्के शकुन्तलायाः प्रस्थाने वनस्थाः जन्तवः।[13] परोक्षतो वैदेहिं सम्बोध्य दशरथविलापः मर्मस्पर्शी वर्तते यथा-

**रामेणापि परित्यक्तो लक्ष्मणेन च गर्हितः।**
**अयशोभाजनं लोके परित्यक्तस्त्वयाप्यहम्॥**[14]

नाटकस्यास्य तृतीयाङ्कः प्रतिमागृहदर्शननामकः भरतस्य शोकभावं निपुणं दर्शयति यत्र भरतः कल्पनालोकात् पतितः सन् प्रतिमागृहे पितुः प्रतिमां विलोक्य तन्निधनवार्ताम् अनुमिनोति, शोकपारावार गच्छति। एवं पमाङ्के सीताहरणप्रसंगोऽपि कारुण्यपूर्णः।

**अध्ययन का उद्देश्य**

तत्र न काव्यव्यंग्यः करुणः प्रत्युत स्थितिव्यंग्यः नाट्यव्यंग्यो वा। सीताविरहस्तु रामगतं शोकम् उद्भावयति। रामः स्वयमेव करुणमूर्तिः प्रतीयते।

**निष्कर्ष**

एवं प्रतिमानाटकस्य वस्तुविन्यासेन ज्ञायते यत् नान्यः कोऽपि रसः प्रधानतामर्हति, करुण एव प्रधानः। करुणस्य शोकभावः स्थायी। स च रामगतः प्रधानतया वर्तते वनवासादारभ्य सीताहरणपर्यन्तः। तथैव भरतगतोऽपि शोकः प्रतिमादर्शनकाले तृतीयाङ्के मार्मिकः। दशरथमृत्युः सम्पूर्णायाः अवधराजधान्याः कृते शोकमयः। रामभरतौ तु पश्चादवगतौ भवतः। एवं शोकस्थायिरूपः करुणो रसः प्रतिमानाटकस्य प्रधानो रसः इति सिध्यति।

**सहायक ग्रन्थावलीः**

1. महाकवि भासः एक अध्ययन, आचार्य बलदेव उपाध्यायः, चौखम्बा विद्याभवनम्, वाराणसी, 1995 ई. (चतुर्थः संस्करणम्)
2. अभिषेकनाटकम् (भासकृतम्) संस्कृतहिन्दीव्याख्यायुतम्, व्याख्याकारः-रामचन्द्रमिश्रः, चौखम्बा विद्याभवनम्, वाराणसी, 1995 ई. (प्रथमसंस्करणम्)
3. प्रतिमानाटकम् (भासकृतम्), संस्कृतहिन्दीव्याख्योपेतम्, व्याख्याकारः-जगदीशचन्द्रमिश्रः, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 1991 ई. (प´्चम् संस्करणम्)
4. ध्वन्यालोकः (आनन्दवर्धनकृतः), हिन्दीव्याख्यायुतः, व्याख्याकारः आचार्य विश्वेश्वरः, ज्ञानमण्डल लिमिटेड, वाराणसी, 2042 (वि.सं.)
5. महाकवि भास, लेखकः-डॉ. नेमिचन्द्रशास्त्री, मध्यप्रदेश हिन्दी अकादमी, भोपाल, 1972 ई.
6. भास ए स्टडी (ए.डी. पुसलकरकृतः आंग्लभाषाग्रन्थः), मुंशीराम मनोहरलाल, दिल्ली, 1968 ई. (द्वितीयसंस्करणम्)
7. वाल्मीकीयरामायणम्, हिन्दी-अनुवादसहितम्, खण्डद्वयेन प्रकाशितम्, गीताप्रेस गोरखपुर।

**सन्दर्भ ग्रन्थ सूची**

1. *काव्यालङ्कारसूत्रम् - 1.3.30*
2. *मालविकाग्निमित्रम् - 1.4*
3. *ध्वन्यालोकः - 4.5*
4. *नाट्यशास्त्रम् - 18.43*
5. *साहित्यदर्पणः - 6.10*
6. *गणपतिशास्त्री - प्रतिमानाटकभूमिका।*
7. *प्रतिमानाटकम् - 4.1 इत्यतः पूर्वं नन्दिनिकावचनम्।*
8. *ए.डी. पुसलकर, भास- ए स्टडी, पृ. 258*
9. *नेमिचन्द्रशास्त्री- महाकविभास, पृ. 373*
10. *ध्वन्यालोकः - 4.5 इत्यतः वृत्तिः-रामायणे हि करुणो रसः स्वयमादिकविना सूत्रितः 'शोकः श्लोकत्वमागतः इत्येवंवादिना।*
11. *प्रतिमानाटकम् - 1.9*
12. *प्रतिमानाटकम् - 1.18 इत्यतः परं सीतायाः कथनम्।*
13. *प्रतिमानाटकम् - 2.2*
14. *प्रतिमानाटकम् - 2.5*